परे खयि परे रुः तस्य च सः । पुंस्कोकिल इत्यादि । बहुव्रीहौ उरःप्रभृतित्वात् नित्यं कप् । सपुंस्का अपुंस्का इत्यादि ।

**पुमनुजा** स्त्री पुमांसमनुरुध्य जायते “अनौ कर्मणि” पा० (अनुपूर्वाज्जनेः कर्मण्युपपदे डः स्यात्) अनु+जन–ड पुमांसमनुरुध्य जाता पुमनुजा” सि०कौ०। “इह जनिः सकर्मकः अनुरोधविशिष्टजननार्थकत्वात्” तत्त्वकौ० पदान्तत्वेन अन्त्यलोपः । पुरुषानन्तरजातायां भगिन्याम् ।

**पुमपत्य** न० पुंरूपमपत्यम् । पुंरूपापत्ये अमरः ।

**पुमाख्या** स्त्री ६त० । १पुरुषसंज्ञायां पुमांसमाख्याति आ+ख्या–क ।“जातिभेदाः पुमाख्याश्च” अमरोक्ते २पुरुषवाचकशब्दे पु० ।

**पुम्भूमन्** पु० ६त० । पुलिङ्गबहुत्वे अमरः ।

**पुर** अग्रगतौ तु०पर०सक० सेट् । पुरति अपोरीत् । [ङीप् ।

**पुरःसर** त्रि० पुरोऽग्रे सरति सृ–ट । अग्रगामिनि स्त्रियां

**पुर** न० पुर–अग्रगमने क । १गेहे २देहे पाटलिपुत्रे ३नगरभेदे ४कुसुमदलहत्तौ मेदि० ५नागरमुस्तायां रत्नमा० ६चर्मणि शब्दर० ७अट्टोपरिगृहे च विश्वः । ८बहुग्रामीणव्यवहारस्थाने बहुहट्टादियुक्ते प्रधानग्रामे न० स्त्री श्रीधरः । स्त्रीत्वे ङीप् । ९पीतभाण्डग्राम् अमरः धान्यादिचये १०राशौ ११गुग्गुलौ च पु० शब्दच० पृ–क । १२पूर्णे प्रचुरे त्रि० । नगरशब्दे ३९१६ पृ० पुरीशब्दे च दृश्यम् । पुरे वर्णनीयपदार्थाः कविकल्पलतायामुक्ता यथा “पुरे हट्टप्रतोली च परिखातोरणध्वजाः । प्रासादाध्वप्रपारामवापीवेश्याससतीत्वरी” ।

**पुरग** त्रि०पुरं गच्छति गम–ड । नगरगामिनि ततः कृशाश्वा० चतुरर्थ्यां छण् । पौरगीय तत्सन्निकृष्टदेशादौ । कोटरादि० वनशब्दे परे दीर्घः, कृतदीर्घात् परस्य वनस्य णत्वम् । पुरागवण नगरगतवने ।

**पुरजित्** पु०पुरं त्रिपुरासुरं जितवान् जि–भूते क्विप् ।१त्रिपुरारौ शिवे त्रिपुरघ्नशब्दे ३३७पृ०दृश्यम् ।२चन्द्रवंश्ये नृपभेदे च “अजोऽथ पुरजित्सुतः” भाग०९।१२।१२श्लो०।

**पुरज्योतिस्** पु० पुरं प्रचुरं ज्योतिरस्य । वह्नौ शब्दार्थक०

**पुरञ्जन** पु० पुरं देहरूपक्षेत्रं जनयति जनि–बा० ख । चेतने जीवे “पुरुषं पुरञ्जनं विद्याद् यद्व्यनक्त्यात्मनः पुरम् । एकद्वित्रिचतुष्पादं बहुपादमपादकम्” भाग०४।२९।४श्लो० । १तदधिष्ठानरूपायां २बुद्धौ स्त्री ङीप् भाग०४।२५–२९ अध्याये पुरञ्जनोपाख्याने दृश्यम् ।

**पुरञ्जय** पु० कृष्णे युवंशे सृञ्जयपुत्रे १नृपभेदे हरिवं०३१अ० २सूर्यवंश्ये काकुत्स्थे त्रिका० । “पुरञ्जयस्तस्य सुत इन्द्रवाह इतीरितः । काकुत्स्थ इति चाप्युक्तः” भाग० ९।६।१२ श्लो० ।

**पुरट** न०पुर–बा०अटन् । सुवर्णे “पुरटलतारूढस्थलविहङ्गमिथुनैः” भाग० ५।२।५ “पुरटलता स्वर्णवल्ल्यः” श्रीधरः

**पुरण** पु० पृ–क्यु । समुद्रे उज्ज्वलदत्तः ।

**पुरतटी** स्त्री पुरस्था तटीव । क्षुद्रहट्टे हारा० ।

**पुरतस्** अव्य० पुर–अतसुच् । अग्रत इत्यर्थे अमरः ।

**पुरद्वार** न० ६त० । गोपुरे नगरप्रवेशद्वारे अमरः ।

**पुरद्विष्** पु० पुराणां मयनिर्मितानां नगरभेदानां दाहकत्वात् द्विट् द्विष–क्विप् ६त०। शिवे जटा०। त्रिपुरघ्नशब्दे ३३७२पृ०

**पुरन्दर** पु० पुरः शत्रूणां दारयति “पूःसर्वयोर्दारिसहोः” पा० खच् । “वाचंयमपुरन्दरौ” पा०नि०। १इन्द्रे अमरः । तस्य शत्रुपुरदारकत्वात् तथात्वम् । स च वैवस्वतमन्वन्तरे इन्द्रभेदः भाग०८।१३।४दृश्यम् २ज्येष्ठानक्षत्रे । ३विष्णौ “आदिदेवः पुरन्दरः” विष्णुस०। ४चव्ये (चइ) ख्याते न० शब्दच० ५गङ्गायां स्त्री हारा० ।

**पुरन्धि** स्त्री द्वि०व० १द्यावापृथिव्योः निघण्टुः । बहु इष्टकाजातं दधाति पुरुधा बहुधा धीयते स्थाप्यते वा धा–कि पृषो० । २इष्टकाभेदे यजु०१४।२ वेददी० ३बहुबुद्धौ स्त्री “कक्षीवते अरदतं पुरन्धिम्” ऋ० १।११६।७ पुरन्धिः बहुधीरिति यास्कः पृषोदरादित्वात् पुरन्धिभावः । यद्वा पुरं पूरयितव्यं सर्वविषयजातमस्यां धीयतेऽवस्थाप्यत इति पुरन्धिर्बुद्धिः कर्मण्यधिकरणे चेति दधातेः किप्रत्ययः । “तत्पुरुषे कृति बहुलमिति” पा०बहुलवचनादलुक् इदं तु व्युत्पत्तिमात्रं वस्तुतः पृषोदरादिरेव” माधवभाष्यम् । पुरन्धिः अस्त्यस्य मतुप् “छन्दसीरः पा०मस्य वः पुरन्धिवत् ऋ०९७।२।४ तद्युते त्रि० ।

**पुरन्ध्रि(न्ध्री)** पुरं गेहस्थजनं धारयति पालयति धृ–खच् ङीप् पृषो० वा ह्रस्वः । बहुकुटुम्बवत्याम्, पतिपुत्रवत्याञ्च स्त्रियां, “अट्टहेष्वट्टे व्याप्यपुरन्ध्रिवर्गम्” कुमा०।

**पुरपाल** पु० पुरं नगरं देहं वा पालयति पालि–अण् । १नगरपाले २देहपालके जीवे च ।

**पुरभिद्** पु० पुराणि त्रिपुरासुरपुराणि भिनत्ति–भिद–क्विप् । महादेवे शिवे हेमच० त्रिपुरघ्नशब्दे दृश्यम् । पुरभेदनादयोऽप्यत्र ।

**पुरमथन** पु० पुरं त्रिपुरासुरं मथ्नाति मथ–ल्यु । शिवे